दिनाङ्क :-25.11.2024

प्रात: - 06:55

प्रधानमन्त्री/भारतमण्डपम/आईसीए

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्लयाः भारतमण्डपम् इत्यत्र आईसीए इत्यस्य वैश्विक-सहकारी-सम्मेलनम् इत्यस्य उद्घाटनम् करिष्यति। अन्ताराष्ट्रिय-सहकारी-संघटनस्य त्रिंशदुत्तकशतवर्षेषु प्रथमतया अस्योपंवेशनम् समाचर्यते। उपवेशनेऽस्मिन् भूटानदेशस्य प्रधानमन्त्री दाशो-शेरिंग-तोबगे, फिजी-देशस्य च उपप्रधानमन्त्री मनोआ-कामिकामिका इत्यपि भागं भजिष्यतः। अस्मत्वार्ताहरैः निगदितं यत् वैश्विकसम्मेलनस्य आयोजनं भारतीय-कृषक-उर्वरक-सहकारी-संघः वैश्विक-सहकारी-संघः भारतसर्वकारः भारतीय-सहकारी-समित्यः, अमूल अथ च कृभको इत्येतैः सहयोगात्करूपेण सम्मिल्य समाचर्यते।

संसद सम्मेलनम्

संसदः शीतकालीन-सत्रम् अद्यारभ्य समारभते। सत्रेऽस्मिन् षड्विंशतिदिवसेषु एकोनविशंत्यः उपवेशनानि समाचरिष्यन्ते। नवम्बरमासस्य षड्विंशे दिनाङ्के संविधान दिवसावसरे उपवेशनस्य आयोजनं न भविष्यति। संविधान- दिवसस्य मुख्य समायोजनं सदनस्य केन्द्रीयकक्षे भविष्यति। यत्र एकोनपंचाशदुत्तरैकोनविंशतितमवर्षस्य षड्विंशे नवम्बरे संविधानम् अङ्गीकृतमासीत्।

विदेशमन्त्री/जी-7

विदेशमन्त्री डॉ. एस.जयशंकरः रोमदेशे जी-सप्त इत्यस्य विदेशमन्त्रिणां सम्पर्कात्मककार्यक्रमे अद्य सहभागितां विधास्यति। आयोजनमिदं इटली देशस्य फिउग्गी इत्यत्र क्रियते। भातदेशस्य अत्र अतिथि-देशत्वेन समाहूतोऽस्ति। अवसरेऽस्मिन् विदेशमन्त्री अन्येषु विशिष्टेषु गतिविधिष्वपि प्रातिभाग्यं विधास्यति।

कोप-29

कॉप एकोनत्रिंशत्-इत्यनेन बाकू, अज़रबैजान इत्येतादृशयोः विकासशीलदेशयोः जलवायु वित्तस्य साम्प्रतिकं स्तरं त्रिगुणितं करणाय सन्धिपत्रं स्वीकृतम्। वरीवर्धितश्च राशिः त्रिशतबिलियन-डॉलर-परिमितं कारयिष्यते। परं भारतेन न केवलं निर्धारितराशेः परं सहमत्याः विधायामपि सुदृढतरः विरोधः प्रदार्शितोऽस्ति। भारतीयवार्ताकारया चांदनी-रैना इत्यनया प्रोक्तं यत् भारतं इमं प्रस्तावस्य साम्प्रतिकं स्वरूपं न स्वीकरोतीति।

अपि च क्रीडावार्तायाम्

क्रिकेट क्रीडा

क्रिकेटनिकषस्पर्धायां ऑस्ट्रेलियायाः पर्थक्रीडाङ्गणे, क्रीडायाः तृतीये दिवसे ह्यः यशस्वीविराटयोः शतकाभयाम् भारतस्य स्थितिः सुदृढतरा जाताऽस्ति। बार्डर-गावस्कर ट्राफी इत्याख्येऽस्मिन् द्वन्द्वे आतिथ्यं स्वीकुर्वता दलेन तृतीय-दिवसस्य क्रीडान्तं यावत् क्रमशः द्वादशधावनाङ्कानां संयोजने एव क्रीडकत्रयः पातितः। सम्प्रति आतिथ्यं प्रददात्रा दलेन इतोऽपि द्वाविंशत्यदिकपञ्चशतधावनाङ्कानि सप्तक्रीडकानां पातनात्प्रागेव रचितव्यानि सन्ति।

इतः पूर्वं भारतीयदलेन षण्णां क्रीडकानां हानावेव सप्ताशीत्यधिक चतुश्शतधाननाङ्कानि विरच्य आह्यत्य चतुश्त्रिंशदधिकपञ्चशत-धावनांकानां वृद्धिः सम्प्राप्ताऽसीत्।

.

इति वार्ताः